8 जन्मदिनोत्सवः

U9P5R9



धारायाः जन्मदिनम् अस्ति। सा नूतनवस्त्रं धारयति। माता धारायै मिष्टान्नं ददाति। सा मिष्टान्नं विद्यालये आनयति।

सुजलाभगिनी धारायाः शिक्षिका अस्ति। सा धारां पृच्छति, अद्य किं विशेषः ? धारा वदति, 'अद्य मम जन्मदिनम् अस्ति।' सुजला धारां अभिनन्दनं ददाति।

धारा : 'वीणाभगिनी कुत्र अस्ति'?

सुजला : सा कार्यालये अस्ति।

धारा वीणासमीपं गच्छति। सा वदति, 'महोदये, कृपया प्रार्थनासभाम् आगच्छतु।' वीणा वदति, 'आम्, अहम् आगच्छामि।'

धारायाः सखी ममता आम्रपालीवृक्षस्य पर्णानि आनयति। सा तोरणं ग्रन्थति। वैशाली प्रार्थनाखण्डे सुशोभनं करोति।



धारा सरस्वतीमातुः चित्रसमीपं गच्छति। अद्य धारा एकादशमे वर्षे प्रविशति। अतः सा तत्र एकादशदीपान् प्रज्वालयति। सरस्वतीमातुः वन्दनाम् करोति। अनन्तरं यज्ञः अपि भवति। धारा अक्षयपात्रे मुष्टिधान्यं स्थापयति। अनन्तरं सा शुभसंकल्पं करोति। आचार्यः जन्मदिनस्य शुभाशिषं ददाति। वीणा धारायै आशीर्वादं ददाति, सुजला अपि आशीर्वादं ददाति। अन्ते धारा सर्वेभ्यः मिष्टान्नं वितरति।

धारा अतीव आनन्दम् अनुभवति।

आचार्यः श्लोकं गायति –

सदा भवन्तु सुखिनः सदैव च निरामयाः ।
विद्यावन्तो यशस्विनः भवन्तु चिरजिविनः ॥

टिप्पणी

अनन्तरम् પછી **आम्रपालीवृक्षः** આસોપાલનું વૃક્ષ **आनयति** લાવે છે **प्रज्वालयति** પ્રગટાવે છે

स्वाध्यायः

Y1J4K2

1. નીચેનાં પદોનું મોટેથી ઉચ્ચારણ કરો અને જોઈને લખો :

जन्मदिनोत्सवः _____, मिष्टान्नम् _____, अभिनन्दनम् _____

आम्रपालीवृक्षस्य _____, एकादशदीपान् _____, प्रज्वालयति _____

2. આ પ્રશ્નોના જવાબ એકમના આધારે લખો :

(1) कस्याः जन्मदिनम् अस्ति ?

(2) वैशाली किं करोति ?

(3) धारा जन्मदिनोत्सवे कस्याः वन्दनां करोति ?

(4) धारा कति दीपान् प्रज्वालयति ?

(5) धारा अक्षयपात्रे किं स्थापयति ?

3. પાઠમાંથી ક્રિયા આધારિત શબ્દો શોધીને લખો :

ઉદાહરણ : धारयति।

_____ _____ _____ _____ _____

_____ _____ _____ _____ _____

4. ઉદાહરણ પ્રમાણે 'कुत्र' વડે પ્રશ્નવાક્ય બનાવો :

उदाहरण : मम गृहं शिवमन्दिरस्य समीपे अस्ति।

भवत:/भवत्या: गृहं कुत्र अस्ति ?

(1) तस्य वाटिका नदीतटे अस्ति।

_____

(2) रफिक: गृहं गच्छति।

_____

(3) मीनाया: मातुलगृहं सिद्धपुरनगरे अस्ति।

_____

(4) हर्ष: गृहस्य समीपे क्रीडति।

_____

(5) माला शालां गच्छति।

_____

5. ઉદાહરણ મુજબ વાક્યો બનાવો :

वीणा आशीर्वादं ददाति, सुजला अपि आशीर्वादं ददाति।

(1) सुरेश: मन्दिरं गच्छति। जयेश: _____

(2) सुधा पुस्तकं पठति। मनोरमा _____

(3) जननी कारयानं चालयति। जनकः _____

(4) शिक्षकः गीतं गायति। छात्रः _____

6. તમારા શિક્ષક આ એકમમાંથી જે શબ્દો બોલે, તે તમારી નોટબુકમાં લખો, જોડણીનું ધ્યાન આપો. લખેલ શબ્દો તમારા શિક્ષક અથવા તમારા સહપાઠીને બતાવો. જો કોઈ ક્ષતિ જોવા મળે તો તેવી ક્ષતિ ન થાય તેનું ધ્યાન રાખો.

प्रवृत्ति :

- તમારા જન્મદિને તમે શું કરો છો ? તેની ચર્ચા વર્ગમાં કરો. તેને લગતાં બે-ત્રણ વાક્યો સંસ્કૃતમાં બોલવાનો પ્રયત્ન કરો.
- જન્મદિનની ઊજવણીમાં શું કરવું જોઈએ ? શું ન કરવું જોઈએ ? તે અંગે ચર્ચાસભાનું આયોજન કરો.
- જન્મદિનોત્સવનાં ગીતો શોધો અને તેનું ગાન કરો.

ज्ञातव्यम्

જન્મદિન પ્રસંગે અપાતાં આશીર્વચન

ॐ शतं जीव शरदो वर्धमानः शतं हेमन्तान् शतमु वसन्तान् ।

शतमिन्द्राग्नि सविता बृहस्पतिः शतायुषा हविषेम पुनर्दयुः ॥